दिनाङ्क :- 06.09.2026

प्रात: - 06:55

प्रधानमन्त्री - एसआरसीसी-संबोधनम्

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् वैश्विक-अनिश्चिततायाः मध्ये अष्ट दशांशोत्तर सप्त प्रतिशतात्मिका त्रैमासिकवृद्धिः भारतस्य आर्थिकसामर्थ्यं प्रदर्शयति। सः उक्तवान् यत् भारतेन नीतिसम्बद्ध-गतिरोधात् नीतिसम्बद्ध-गतिशीलतां प्रति दीर्घा यात्रा कृता। ह्यः नवदिल्ल्यां श्रीराम-कॉलेज्-ऑफ-कॉमर्स् इत्यस्य महाविद्यालयस्य शताब्दीसमारोहे जनसभां सम्बोधयन् श्रीमोदी उक्तवान् यत् विश्वं भारतं तीव्रगत्या वर्धमानां प्रमुखाम् अर्थव्यवस्थां भवितुं पश्यति। प्रधानमन्त्रिणा अद्यतनोपलब्धीनां पूर्वकालीनैः सङ्घर्षैः सह तुलनां कुर्वता उक्तं यत् आतङ्कवादः पराजितः अस्ति अथ च सशस्त्रबलानि स्वभूमावेव शत्रून् विरुद्धं दृढतया प्रहारं कुर्वन्ति। जम्मू-कश्मीरतः पूर्वोत्तरभारतपर्यन्तं शान्तिश्च पुनः स्थापिता अस्ति।

निरन्तर-क्रियमाणानाम् आलोचनानां प्रत्युत्तररूपेण प्रधानमन्त्री सुदृढार्थिक-तथ्याङ्कान् प्रस्तुतवान्। सः उक्तवान् यत् स्मार्टफोन इत्येतस्य निर्यातः अधुना पञ्च दशांशोत्तर द्विलक्षकोटि-रूप्यकाधिकः अभवत्। प्रधानमन्त्रिणा उक्तं यत् श्रीराम-कॉलेज्-ऑफ-कॉमर्स् इत्यनेन महाविद्यालयेन विगतेषु वर्षेषु शैक्षणिकोत्कृष्टतायाः क्षेत्रे विशिष्टा प्रतिष्ठा प्राप्ता अस्ति।

असौ एसआरसीसी-महाविद्यालयस्य पूर्वछात्रान् अतिविशिष्टान् वर्णयन् तान् ‘OGs’ इति विशिष्टाधुनिकोपाधिना सम्बोधितवान्। प्रधानमन्त्रिणा उक्तं यत् पूर्ववित्तमन्त्री अरुणजेटली अपि एसआरसीसी-महाविद्यालयस्य पूर्वछात्रः आसीत्। सः उक्तवान् यत् अस्य महाविद्यालयस्य पूर्वछात्राः प्रत्येकस्मिन् क्षेत्रे स्वकीयं विशिष्टं चिह्नं स्थापितवन्तः। प्रधानमन्त्री मोदी उक्तवान् यत् शतवर्षीयम् इदं महत्त्वपूर्णं चरणं महाविद्यालयस्य तथा राष्ट्रस्य शिक्षाक्षेत्रस्य च कृते अत्यन्तं महत्त्वपूर्णम् अस्ति। असौ संस्थापकं श्रीरामम् श्रद्धया स्मृत्वा तस्य स्थायिदृष्टिं प्रति सम्माननं प्रकटितवान्।

राष्ट्रपतिः - नियुक्तिः

राष्ट्रपतिपदासीनया द्रौपदी मुर्मु इत्यनया ह्यः डॉ. दिनेशशर्मा इत्येषः अण्डमान-निकोबार-द्वीपसमूहस्य उपराज्यपालरूपेण नियुक्तः। राष्ट्रपतिभवनेन प्रसारिते एकस्मिन् विज्ञप्तौ एतत् सूचितम्। डॉ. शर्मा सप्तदशाधिक-द्विसहस्रतमवर्षस्य अक्टूबर-मासात् अण्डमान-निकोबार-द्वीपसमूहस्य उपराज्यपालरूपेण कार्यं कुर्वन्तं सेवानिवृत्तम् एडमिरल् देवेन्द्रकुमार-जोशीम् अनुसरिष्यति। डॉ. शर्मा सम्प्रति उत्तरप्रदेशतः राज्यसभासांसदः अस्ति। असौ पूर्वं राज्यस्य उपमुख्यमन्त्रिपदम् अपि अलङ्कृतवान्।

भारत-नेपाल-उद्धारदलानि

भारत-नेपालयोः उद्धारदलानि चिलिमे-सुरङ्गे उद्धारकार्यं निरन्तरं कुर्वन्ति। नेपालस्थितः भारतस्य राजदूतः नवीनश्रीवास्तवः ह्यः उक्तवान् यत् उद्धारकार्यं सुकरं कर्तुं समीपस्थस्य स्याब्रुबेसी-प्रदेशात् सुरङ्गस्य प्रवेशद्वारपर्यन्तं सम्पर्कमार्गस्य निर्माणकार्यमपि प्रचलति।

नेपाले जातस्य विनाशकारिणः अकस्मादाप्लावस्य कारणेन मृतकानां सङ्ख्या चतुश्चत्वारिंशदधिक-त्रयोदशशतपर्यन्तं जाता। प्रभावितेषु अष्टसु जनपदेषु उद्धारकार्याणि प्रचलन्ति, यदा प्रायः पञ्चसहस्रजनाः अद्यापि विलुप्ताः सन्ति।

ऋतु-विज्ञान-विभाग:

भारतर्तुविज्ञान-विभागेन संसूचितं यत् श्वः यावत् उत्तरपूर्वीयेषु राज्येषु, उपहिमालयीय-पश्चिमबङ्गाल-सिक्किम-बिहार-उत्तरप्रदेश-उत्तराखण्ड-पञ्जाब-चण्डीगढ-हरियाणा-पूर्वराजस्थान-दिल्ली-मध्यप्रदेशेषु च अतिवृष्टेः सम्भावना अस्ति। राष्ट्रराजधानीं समेत्य देशस्य विभिन्नेषु भागेषु ह्यः मध्यमात् प्रबलपर्यन्तं वर्षा जाता। ऋतुविभागेन अद्यापि समानाः ऋतु-परिस्थितयः प्रवर्तिष्यन्ते इति पूर्वानुमानितम्।

महिला-क्रिकेट्

महिला-क्रिकेट्क्रीडायां, दुबईनगरे आयोजितायां विशति-प्रतिविंशति-महिला-एशिया-चषक-प्रतिस्पर्धायां भारतेन पाकिस्तानदलं सप्तस्तोभैः पराजितम्। भारतम् अधुना पाकिस्तानस्य विरुद्धम् आयोजितासु अष्टसु महिला-विंशति प्रतिविशति एशिया-चषक-प्रतिस्पर्धासु सप्तसु विजयम् अधिगतवत्।

।। इति वार्ता:।।